# संस्कृत-वार्ता:

दिनाङ्क : 08.01.2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा नरेन्द्रमोदिना समुदीरितं यत् भारतं एतादृशं अपूर्वं ए आई प्रारूपं प्रस्तुयाद्, येन भारते निर्मितं, विश्वाय निर्मितम् , इत्यस्य भावना प्रतिबिंबिता भवेत्।
- गुजरातस्य प्रभास-पटन-नगरे चतुर्दिवसीय सोमनाथ-स्वाभिमान-पर्व आरभत। यत् सोमनाथ मंदिरस्य शाश्वतभावनाया: उत्सवो वर्तते।
- प्रधानमन्त्री नरेन्द्र मोदी सबलम् अवदत् यत्, भारतस्य सभ्यतागत संकल्पेन एतत् सुनिश्चितं यत् सोमनाथस्य मुहुर्मुह: पुननिर्माणं भवेत् अपि च, इदं पर्व देशस्य नैकानां बालकानां स्मरणम् अपि अस्ति, ये कदापि स्वसिद्धान्तानां नीतिनां च अनादरम् न कृतवन्तः।
- भारतस्य आर्थिकी संवृद्धिः सप्त-दशांश-षट्प्रतिशतं भविष्यतीति अनुमानितम्।
- प्रवर्तन निदेशालय: सम्पूर्णे देशे एकस्य सङ्गठित-दलस्य विरुद्धं कूट-शासकीय-नियुक्ति-वञ्चनाप्रकरणे पञ्चदश-स्थानेषु सहसान्वेषणं करोति।
- बैडमिंटन-क्रीडायाम् भारतीय-क्रीडिका पी. वी. सिन्धुः कुआलालंपुरे मलेशिया-मुक्त-बैडमिंटन-प्रतियोगितायाः उपान्त्य-चक्रे प्रविष्टवती।

---------------------------------------------------

<u>कृत्रिम-बुद्धिमत्ता</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य नवदिल्ल्यां स्वनिवासस्थाने भारतीय-कृत्रिम-बुद्धिमत्ता-नवोद्योगैः सह राउंडटेबल-सम्मेलनस्य अध्यक्षता कृता। अग्रिमे मासे भारते आयोजनात् षड्विंशत्यधिक-द्विसहस्रतम-वर्षस्य भारतीय-कृत्रिम-बुद्धिमत्ता-प्रभाव-शिखर-सम्मेलनात् पूर्वं, द्वादश भारतीय-कृत्रिम-बुद्धिमत्ता-नवोद्योगाः, ये “AI for All: Global Impact Challenge” इति वैश्विक-प्रभाव-समाह्वाह्नम्-कार्यक्रमाय योग्यतां प्राप्तवन्तः, ते सम्मेलनेऽस्मिन् भागम्

अगृह्णन्। सभायां ते स्वविचारान् स्वकार्याणि च प्रस्तुतवन्तः। एता: नवोद्योग-संस्थाः व्यक्तिगत-विषयवस्तु- भारतीय-भाषा-आधारित-प्रतिरूपस्य, ई-वाणिज्यस्य, विपण्या:, उत्पादक-कृत्रिम-बुद्धेः च उपयोगेन श्रीडी-विषयवस्तु-निर्माणं, अभियान्त्रिक-अनुकरणानि, स्वास्थ्य-सेवायां निदानं, चिकित्सा-अनुसन्धानं च इत्यादिषु विविधेषु क्षेत्रेषु कार्यं कुर्वन्ति। सभायां प्रधानमन्त्री अवदत् यत् अग्रिमे मासे भारतं भारतीय-कृत्रिम-बुद्धि-प्रभाव-शिखर-सम्मेलनस्य आतिथ्यं करिष्यति। श्रीमोदी सबलम् उक्तवान् यत् नवोद्योगाः कृत्रिम-बुद्धिमत्ता-उद्यमिनः च भारतस्य भविष्यस्य सहनिर्मातारः सन्ति, अपि च देशे नवान्वेषणस्य बृहदाकार-कार्यान्वयनस्य च बहव्य: सम्भावना: सन्ति। प्रधानमन्त्रिणा नरेन्द्रमोदिना समुदीरितं यत् भारतं एतादृशं अपूर्वं ए आई प्रारूपं प्रस्तुयाद्, येन भारते निर्मितं, विश्वाय निर्मितम् , इत्यस्य भावना प्रतिबिंबिता भवेत्।

---

## <u>सोमनाथ-स्वाभिमान-पर्व</u>

षड्विंशत्यधिकैकसहस्त्र तमे वर्षे मोहम्मद् गजनी इत्यस्य सोमनाथमन्दिरस्य उपरि प्रथम-आक्रमणस्य सहस्त्रवर्ष स्मरणार्थम् अद्य गुजरातस्य तटीयनगरे प्रभास-पटन-नगरे सोमनाथ-स्वाभिमान-पर्व आरभत। अस्मिन् वर्षे उत्सवः पुनःस्थापितस्य मन्दिरस्य उद्घाटनस्य वार्षिकोत्सवेन सह अपि समागच्छति। भारतीयसंस्कृतिं प्रति दृढविश्वासं आत्मसम्मानं च प्रदर्शयन्तः चतुर्दिवसीये कार्यक्रमे देवालयस्य परिसरे अनेकाः आध्यात्मिक-सांस्कृतिक-सामाजिक-गतिविधिय: भविष्यन्ति।

सोमनाथ-स्वाभिमान-पर्व इत्यस्य आरम्भे प्रधानमन्त्रिणा नरेन्द्रमोदिना राष्ट्राय शुभाशयाः प्रेषिता: । एकस्य सामाजिकान्तर्जालीय पटलस्य श्रृङ्खलायां सः अवदत् यत्, ऐतिहासिक-अवलोकनं भारतस्य अत्यन्तं पूज्य-तीर्थस्थलैः सह सम्बद्धां स्थितिस्थापकताम् सुदृढ़ विश्वासं च प्रतिबिम्बयति। सः अवदत् यत्, इदं पर्व देशस्य नैकानां बालकानां स्मरणम् अपि अस्ति, ये कदापि स्वसिद्धान्तानां नीतिनां च अनादरम् न कृतवन्तः। प्रधानमन्त्री अवदत् यत्, मुहुर्मुहुः आक्रमणं भवति चेदपि, भक्तानां नित्यविश्वासः, भारतस्य सभ्य-संकल्पः च सोमनाथस्य मुहुर्मुहुः निर्माणं सुनिश्चितं करोति।

-------------------------------------------------

## जीडीपी-मॉर्गन-स्टेनली

भारतस्य आर्थिकी संवृद्धिः राष्ट्रिय-साङ्ख्यिकी-कार्यालयस्य प्रथमाग्रिम-अनुमानात् अधिका भविष्यतीति आशास्यते । इयं तावत् गतसितम्बर-मासतः नीतिगत-निर्णयैः प्राप्तं सकारात्मकम् उच्च-आवृत्ति-मानाङ्कं प्रदर्शयति। मॉर्गन-स्टेनली इत्यस्य एकेन प्रतिवेदनेन षड्विंशत्यधिक-द्विसहस्रतमे वित्तीय-वर्षे वास्तविक-सकलान्तरिक-उत्पाद-संवृद्धिः सप्त-दशांश-षट्प्रतिशतं भविष्यतीति अनुमानितम्। एतत् राष्ट्रिय-साङ्ख्यिकी-कार्यालयस्य वित्तीय-वर्षाय कृतस्य सप्त-दशांश-चतुःप्रतिशतानुमानात् अधिकम् अस्ति। राजकोषीय-मौद्रिक-नीति-समर्थनम्, उत्तमा क्रय-शक्तिः, श्रम-विपण्याः सुदृढ-परिदृश्यञ्च एतत् सुनिश्चेष्यति यत् उपभोग-पुनरुत्थानं इतोऽपि व्याप्नुयादिति।

इतः पूर्वं NSO-संस्थायाः मानाङ्क-तथ्येषु प्रतिक्रियां प्रयच्छन् प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् भारतस्य "परिष्कारात्मक-द्रुतयानम्" अनवरतं समेधते । सः अकथयत् यत् संवृद्धेः एतत् परिदृश्यं एनडीए-सर्वकारस्य निरन्तर-निवेशेन तथा याचनाधारित-नीतिगत-उपायैः प्रेरितम् अस्ति।

-------------------------------------------------

## प्रवर्तन-निदेशालयः

प्रवर्तन-निदेशालयः सम्पूर्णे देशे एकस्य सङ्गठित-दलस्य विरुद्धं कूट-शासकीय-नियुक्ति-वञ्चनाप्रकरणे सहसान्वेषणं करोति । संस्थया सूचितं यत् वञ्चनेयम् आदौ भारतीय-रेलवे इत्यस्य नाम्ना प्रकाशमापन्ना । परन्तु अन्वेषणेन ज्ञातं यदस्मिन् चत्वारिंशदधिकाः अन्याः सर्वकारीय-संस्थाः विभागाश्च सम्मिलिताः सन्ति। षड्-राज्यानां त्रयोदश-नगरेषु पञ्चदश-स्थानेषु च सहसान्वेषणं जायते । एतेषु बिहारे मुजफ्फरपुर-मोतिहारी च, पश्चिमबङ्गाले कोलकाता, केरले एर्नाकुलम-पण्डालम-अदूर-कोडूर इत्येतानि , तथैव तमिलनाडु-राज्ये चेन्नई, गुजराते राजकोटः सहैव उत्तर-प्रदेशे च गोरखपुर-प्रयागराज-लखनऊ-नगराणि सम्मिलितानि सन्ति।

प्रवर्तन-निदेशालयेन प्रोक्तं यत् अयं समूहः कूट-ईमेल-लेखानाम् उपयोगं कृत्वा, राजकीयाधिकारं आभासयित्वा कूट-नियुक्ति-पत्राणि प्रेषयति स्म।

---------------------------------------------------

**विकसित - भारत**

विकसित - भारत -युवनेतृणां संवादः श्वः नव-दिल्ल्यां भारतमण्डपे भविष्यति। वार्ताहरैः सह वार्तालापं कुर्वन्, युवा-कार्य-क्रीडा-मन्त्री डा. मन्सुख माण्डवीया अवदत् यत्, कार्यक्रमस्य चतुर्षु दिनेषु, अशेषात् हि देशात् युवनेतारः प्रधानमन्त्री-नरेन्द्र-मोदी-वर्यस्य समक्षं विकसित-भारतस्य -विषये स्वविचारान् उपस्थापयितुं समागमिष्यन्ति इति। सः अवदत् यत्, संवादोऽयं देशस्य युव-शक्तिं अग्रतः नेतृत्वं कर्तुं, वास्तविकप्रतिसन्धिं स्वीकर्तुं, भारतस्य भविष्यस्य सह-निर्माणार्थं च सशक्तं करोति।

---------------------------------------------------

**बैडमिंटन**

बैडमिंटन-क्रीडायाम् भारतीय-क्रीडिका पी. वी. सिन्धुः कुआलालंपुरे मलेशिया-मुक्त-बैडमिंटन-प्रतियोगितायाः उपान्त्य-चक्रे प्रविष्टवती। सा अद्य केवलं द्वात्रिंशत् निमेषेषु जपान-देशस्य टोमोको-मियाज़ाकी इत्येनां द्वाविंशतिः-अष्ट, एकविंशतिः-त्रयोदश अङ्कैः पराजितवती। अनेन विजयेन सिन्धुः मलेशिया-ओपन्-क्रीडायाः चतुर्थवारं उपान्त्य-चक्रे प्रविष्टवती।

॥ इति वार्ताः ॥